# Chitraguptaproktamam Shivabhaktyutkarshavarnanam

# ચિત્રગુપ્તપ્રોક્તમં શિવભક્ત્યુત્કર્ષવર્ણનમ્

## Document Information

Text title : Chitraguptaproktamam Shivabhaktyutkarshavarnanam

File name : shivabhaktyutkarShavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 8 | 61-89 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# ચિત્રગુપ્તપ્રોક્તમં શિવભક્ત્યુત્કર્ષવર્ણનમ્

ચિત્રગુપ્તઃ -
શૃણુ શામ્ભવસઙ્ઘાનાં વાર્તાં શ્રોત્રમનોહરામ્ ।
યદ્વાર્તાશ્રવણેનાપિ શિવભક્તિર્દૃઢા ભવેત્ ॥ ૬૧॥

શામ્ભવાનામયં સઙ્ઘઃ સુધારાશિરિવાધુના ।
દૃષ્ટોઽધ્યાનન્દપીયૂષમયૂખાન્ જનયત્યહો ॥ ૬૨॥

ક્ષણમપ્યાયુષો નાસ્ય વૈયર્થ્યં શિવપૂજયા ।
આયુઃ ક્ષીણમભૂદસ્ય પ્રતિક્ષણશિવાર્ચનાત્ ॥ ૬૩॥

સુધાધારાભિષેકેણ શિવપૂજા પ્રતિક્ષણમ્ ।
તયા ક્ષણસહસ્રાંશોઽપ્યસ્ય નાભૂત્ વૃથા યમ ॥ ૬૪॥

તેન પુણ્યેન મહતા નૃત્યન્તિ પ્રહસન્તિ ચ ।
લિઙ્ગપૂજાં ચ કુર્વન્તિ પુનઃ પુનરિહાન્તક ॥ ૬૫॥

એતત્સઙ્ગાશ્રયાણાં તુ ધનાનિ વિવિધાનિ ચ ।
જાનાતિ શિવપૂજાર્થં તેન ગાયન્તિ કોટિશઃ ॥ ૬૬॥

એતત્સઙ્ગસમાશ્રયામિતધનૈરભ્યર્ચિતઃ શઙ્કરો
નિત્યં ચન્દનબિલ્વપલ્લવલસન્મન્દારકુન્દાદિભિઃ ।
નૈવેદ્યૈરમિતૈર્મનોહર મહાકર્પૂરદીપાવલી-
સઙ્ઘૈરપ્યમિતે રનુક્ષણમતો નૃત્યન્તિ ગાયન્તિ ચ ॥ ૬૭॥
(સઙ્ઘૈરપ્યમિતે અનુક્ષણમિત્યારભ્ય ધનૈરિત્યન્તં)॥ ૬૭॥

તેષામેવ ધનૈઃ શિવાર્ચનમભૂત્ પઞ્ચામૃતૈઃ શોધિતૈઃ
શુદ્ધૈસ્તૈઃ કપિલાઘૃતૈરપિ સદા ધારાપિ લિઙ્ગે મુદા ।
વિચ્છિન્ના ન ભવત્યનન્તવિભવા સા મુક્તિધારા પરા
ગોક્ષીરાદિકધારયાપિ ગિરિશઃ સન્તુષ્ટ એવાન્વહમ્ ॥ ૬૮॥

રત્નાગારવિશેષનિર્મિતમહાલિઙ્ગપ્રભાપૂરકૈઃ

તદ્દ્રવ્યૈરમિતઃ શિવાર્ચનફલૈઃ સાઙ્ગૈરમોઘૈરપિ ।
તેનૈતે શિવપૂજનોત્સવરસાઃ સ્વાનન્દધારાવૃતાઃ
કલ્યાણાશ્રયપૂજનાય સતતં નૃત્યન્તિ ગાયન્તિ ચ ॥ ૬૯॥

તત્સઙ્ઘાશ્રિતવિત્તપૂજનફલૈઃ તાવત્પ્રનૃત્યન્ત્યહો
ગાયન્ત્યેવ વહન્તિ સન્તતમમી શ્રીરુદ્રવીણાદરાઃ ।
શમ્ભો શઙ્કર ચન્દ્રશેખર મહાદેવેતિ સપ્તસ્વર-
વ્યાપારપ્રકરપ્રચારનખવ્યાપારસારાદરૈઃ ॥ ૭૦॥

સ્વપ્નેઽપ્યમ્બુજબિલ્વપલ્લવરસૈરભ્યર્ચયન્તીશ્વરં
નિદ્રાયામપિ ચિત્રમેતદપરં નિદ્રાઽપિ તેષાં ક્ષણમ્ ।
આયુર્વૃદ્ધિમુપૈતિ શઙ્કરપદામ્ભોજાર્ચનાદન્વહં
તસ્ય ક્ષીણદશા કદાપિ ન ભવત્યર્ધેન્દુમૌલિસ્મૃતેઃ ॥ ૭૧॥

તેષાં તાવદપારશઙ્કરકથાપીયૂષપાનાત્ તનુઃ
પીના પીનતરાઽપિ તે મુહુરુમાકાન્તામ્બિકાનાયકમ્ ।
સ્મૃત્વા ચેતસિ સન્તતં કથમપિ ત્વામેવ દેવોત્તમં
મત્વા શઙ્કરનામધેયસુસુધાપાનૈર્નયામો દિનમ્ ॥ ૭૨॥

તેષામાયુરનુક્ષણં પણગણૈર્વેશ્યામુખાલોકનૈઃ
મદ્યસ્ત્રીપરિસેવનેન ચરિતં પણ્યાઙ્ગણાલાપનૈઃ ।
તેનાશ્રાવ્યતયા નયન્તિ દિવસાંસ્તે મેચકાકારતાં
સમ્પ્રાપ્યાપિ મુહુર્મુહુઃ શિવકથાલાપોઽપિ તૈર્ન શ્રુતઃ ॥ ૭૩॥

હા હન્તામિતવિત્તનાશનકરવ્યાપારભારાદરૈઃ
નીતં તદ્દિનમન્ધકારિવિમુખૈઃ દુઃખોપકારાદરૈઃ ।
આરાધ્યઃ શિવ ઇત્યપારવિભવો નૈવાનુભૂતો ભવો
ભાવૈઃ સાકમભાષણં ચ કૃતમિત્યજ્ઞઃ પરં ક્લિશ્યતિ ॥ ૭૪॥

અજ્ઞાનાદ્ગિરિશાર્ચનં ન ચ કૃતં લિઙ્ગં ચ નાલોકિતં
લિઙ્ગાગારમહોત્સવોઽપિ ન કૃતો દૃષ્ટા ન દીપાવલી ।
લિઙ્ગાગારવિનિર્મિતા વિધિવશાદ્ ધૂપપ્રધૂપાવલી
દૃષ્ટા નૃત્યતિ ચિન્તયા પરમયં સઙ્ઘઃ પરં (સદ્યઃ સ્વયં)ક્લિશ્યતિ ॥ ૭૫॥

નાનાપાપવિનાશિની શિવકથા નાકર્ણિતા ન શ્રુતં
નામાપિ સ્મરવૈરિણઃ સકરુણઃ શ્રીશૂલપાણિઃ સ્વયમ્ ।
નૈવાન્તઃકરણામ્બુજે સ્મૃત ઇતિ વ્યર્થં વયો નિર્ગતં

હા હા હન્ત વયો વૃથા ગતમિતિ વ્યર્થં રુદન્ત્યદ્ય તે ॥ ૭૬॥

આયુર્વ્યર્થમિદં ગતં શિવપદં ન ધ્યાતમેવાદરાત્
લિઙ્ગે બિલ્વદલં પ્રસૂનમમલં ગઙ્ગાજલં વા મુદા ।
ન ક્ષિપ્તં ન ચ વીક્ષિતં ચ નગરં વિશ્વેશ્વરસ્યાદરાત્
ઇત્થં તે પ્રલપન્તિ હન્ત બત તે તે તેઽપિ તે તેઽપિ તે ॥ ૭૭॥

શ્રીવિશ્વેશ્વરલિઙ્ગમુત્તમતમં શ્રીચન્દનેનાનર્ઘૈઃ
પુષ્પૈર્બિલ્વદલૈશ્ચ નાર્ચિતમહો ક્ષીણં વયઃ સર્વથા ।
હા હન્તામિતપાતકાર્જનરતં ચિત્તં વયો નિર્ગતં
કિં કર્તવ્યમિતિ પ્રતિક્ષણમમી દુઃખાતુરાઃ કાતરાઃ ॥ ૭૮॥

શ્રીવિશ્વેશ્વરપૂજનં ચ ન કૃતં દ્વિત્રૈઃ પવિત્રૈર્નવૈઃ
બિલ્વૈઃ કોમલપલ્લવૈઃ જલરુહૈર્દૂર્વાઙ્કુરૈર્ભસ્મના ।
(બિલ્વૈઃ કોમલપલ્લવૈઃ અભિનવૈર્દૂર્વાઙ્કુરૈર્ભસ્મના)।
નો દૃષ્ટં નિકટાપદામ્બુજયુગં નારાધિતં ચન્દનૈઃ
મલ્લીમાલિકયા દુકૂલકલિકૈરિત્યન્વહં દુઃખિતાઃ ॥ ૭૯॥

ન સ્નાતં મણિકર્ણિકામ્ભસિ ચ વૈ નોદ્ધૂલિતેયં તનુઃ
ભૂત્યા ફાલમપિ ત્રિપુણ્ડ્રરચનૈર્નાલઙ્કૃતં ભસ્મના ।
રુદ્રાક્ષૈશ્ચ ન ભૂષિતા તનુરહો વ્યર્થં ગતં જીવનં
હા હન્તેતિ બતેતિ દૈવહતમિત્યેતે રુદન્તિ સ્વતઃ ॥ ૮૦॥

વીરેશાય ન કલ્પિતાતિરુચિતા સા નીરધારા મુહુઃ
શ્રીવીરેશ્વરતઙ્ગલિઙ્ગમસકૃન્નાભ્યર્ચિતં ચન્દનૈઃ ।
સાયં ન પ્રણતં ચ નેક્ષિતમહો ભૂતોપવાસૈર્નિશા
નીતા નેતિ રુદન્તિ હન્ત સતતં તે કાલ ભીત્યા તવ ॥ ૮૧॥

કાશ્યામેવ ન કાલભૈરવદિને કાલાષ્ટમીનામકે
કૃત્વા જાગરણં મુહુર્મુહુરયં દૃષ્ટો મયા ભૈરવઃ ।
કાલેશોઽપિ ન વીક્ષિતો મુહુરહો હા હન્ત હન્તેત્યમી
દુઃખેનૈવ નયન્ત્યનુક્ષણમહો તે કાલ ભીત્યા તવ ॥ ૮૨॥

- -

ઇતિ તદ્વચનં શ્રુત્વા યમો વિસ્મયમાનસઃ ।
શિવભક્તગણં દૃષ્ટ્વા પૂજયામાસ સંસ્તુવન્ ॥ ૮૩॥

ધન્યં કુલમિદં દૃષ્ટં શિવભક્તાયુષાં મયા ।
ધન્યં ધન્યમિદં તાવત્ જીવનં નયનામ્બુજમ્ ॥ ૮૪॥

એતદાલોકનેનૈવ વિનેયઃ સમયો મયા ।
અપૂર્વોઽયં શિવગણઃ શિવનામમહોત્સવઃ ॥ ૮૫॥

કથં ગાયન્તિ દિવ્યાનિ શિવનામાનિ કોટિશઃ ।
આનન્દોદ્બોધકાન્યેવ મુહુર્મુહુરતન્દ્રિતાઃ ॥ ૮૬॥

એતે ધન્યાઃ પરં ધન્યાઃ સર્વે તદ્વીક્ષણાદરાઃ ।
ધન્યસ્તદઙ્ગવાસોઽપિ મુક્તિકાન્તાનુકર્ષકઃ ॥ ૮૭॥

સઙ્ગોઽપિ તાવત્ કર્તવ્યઃ તાવદેતૈઃ સહાન્વહમ્ ।
એતત્સઙ્ગાનુષઙ્ગોઽપિ ભુક્તિમુક્તિપ્રદો ભવેત્ ॥ ૮૮॥

ધન્યં ધન્યમિદં શરીરમધુના ધન્યાઙ્ગસઙ્ગાદયં
ધન્યઃ શાઙ્કરસઙ્ગ ઇત્યનુગતો બ્રહ્માદિદેવસ્તુતઃ ।
અસ્માકં ગિરિજામનોહરપદામ્ભોજાર્ચનં જાયતે
બુદ્ધિઃ શાઙ્કરતોત્તમોત્તમતમા મુક્તિપ્રદાનોદ્યમા ॥ ૮૯॥
(બુદ્ધિઃ સિદ્ધિકરોત્તમોત્તમતમા મુક્તિપ્રદાનોદ્યતા)॥ ૮૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ચિત્રગુપ્તપ્રોક્તમં શિવભક્ત્યુત્કર્ષવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૮ -
આયુમૂર્તિશિવભક્ત્યુત્કર્ષવર્ણનમ્ । ૬૧-૮૯॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 8 -
AyumUrtishivabhaktyutkarShavarNanam . 61-89..

Notes:
Citragupta ચિત્રગુપ્ત explains to Yama યમ about the merits of worshiping Śiva શિવ; and as a result, wonderment and devotion towards Śiva શિવ is aroused in Yama યમ.

Proofread by Ruma Dewan

*Chitraguptaproktamam Shivabhaktyutkarshavarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*